SHODHPATRA: INTERNATIONAL JOURNAL OF SCIENCE AND HUMANITIES
E-ISSN: 3048-6041 | Volume- 3, Issue- 5 | May 2026

# वेदेषु नारीणां स्थितिः अधिकाराश्चः एकं विश्लेषणम्

**Palash Mondal**
Visva-Bharati University

**संक्षिप्तसारः**

वेदाः भारतीयसंस्कृतेः प्राचीनतमाः आधाराः सन्ति, यत्र न केवलं दार्शनिकविचाराः अपितु सामाजिक-नैतिक-शैक्षिकमूल्यानां गम्भीरं विवेचनं प्राप्यते। विशेषतः वेदेषु नारीणाम् अधिकारः सामाजिकस्थानं च महता गौरवेण प्रतिष्ठापितम् अस्ति। ऋग्वेदादिषु चतुर्षु वेदेषु नारीभ्यः पुरुषवदेव ज्ञानार्जनस्य, शिक्षायाः, यज्ञोपवीतसंस्कारस्य तथा वैदिकाध्ययनस्य पूर्णाधिकारः प्रदत्तः आसीत्। वेदेषु गार्गी-मैत्रेयी-लोपामुद्रा-अपाला-सदृशानां विदुषीनां ऋषिकाणां उल्लेखः दृश्यते, येन ज्ञायते यत् स्त्रियः केवलं गृहकर्मणि न, अपितु वैचारिक-आध्यात्मिक-क्षेत्रेषु अपि समानाधिकारेण सक्रियाः आसन्। 'संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्' इति वेदवाक्यं स्त्री-पुरुषयोः सामाजिकसमानतां स्पष्टं करोति। वेदकालीनसमाजे नारीणां कृते उच्चशिक्षायाः अवसरः, विवाहविषये स्वेच्छा, गृहस्थजीवने समानभागित्वं तथा पितृसम्पत्तौ कन्यानां पुत्रवत् उत्तराधिकारः अपि व्यावहारिकरूपेण स्वीकृतः आसीत्। अतः निष्कर्षतः वक्तुं शक्यते यत् वेदाः भारतीयनारीणां अधिकाराणां प्राचीनतमां प्रामाणिकीं च आधारभूमिं प्रस्तूयन्ते। एतद् शोधपत्रं वेदानां परिप्रेक्ष्ये आधुनिकसमाजे नारी-अधिकाराणां प्रासंगिकतां विवृणोति।

**अवतरणिकाः**

वेदो भारतीयसंस्कृतेः आत्मा एव। अयं मानवसभ्यातायाः प्राचीनतमग्रन्थेषु परिगण्यते। वेदशब्दो ज्ञानार्थकाद् विद् धातोः घञ्प्रत्ययेण निष्पन्नो भवति। अतः वेदो नाम ज्ञानम्। प्राचीनाः ऋषयः यत्ज्ञानम् स्वेषां आर्षदृष्टौ संप्राप्तवन्तः तस्यैव ज्ञानस्य संग्रहः वेदे कृतः। चतुर्वेदभाष्यकारः सायणाचार्यः वेदं परिभाषयितुं अकथयत् यत् —

"इष्टप्राप्त्यनिष्ठपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः।"

अर्थात् यो ग्रन्थो ईष्टप्राप्तेरनिष्टनिवारणस्य चोपायं कथयति ज्ञापयति वा स ग्रन्थो वेद इति अभिधीयते। श्रुतिः, निगमः, आगमः, त्रयी, छन्दस्, स्वाध्यायः, आम्नायः चेति वेदस्य अन्यानि नामानि सन्ति। अयं वेद हिन्दुधर्मस्य तथा मानवधर्मस्य आधारशिला अस्ति। भारतभूमौ धर्मस्य मूलतत्त्वानि ज्ञातुं वेद एव प्रमुखः सहायको भवति। आचार्यैण मनुना समाम्नातं —

"वेदोऽखिलो धर्ममूलम्।"[1]

मनुभगवान् सर्वेषां ज्ञानानाम् आधारत्वेन वेदं स्वीकृत्य उवाच -

"यः कश्चित् कस्यचित् धर्मो मनुना परिकीर्तितः।

सः सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः।।"[2]

Published: 13 May 2026
DOI: https://doi.org/10.70558/SPIJSH.2026.v3.i5.45734
Copyright © 2026 The Author(s). This work is licensed under a Creative Commons Attribution 4.0 International License (CC BY 4.0).

[1] मनु- २.६

[2] मनु- २.७

वेदेषु दार्शनिकः सिद्धान्तः, राजनीतिशास्त्रं, समाजशास्त्रं, अध्यात्मविद्या, मनोविज्ञानं, आयुर्वेदः, गणितः, भौतिकी, रसायनशास्त्रं, वनस्पतिशास्त्रं जन्तविज्ञानं, अर्थशास्त्रं, नाट्यशास्त्रं, काव्यशास्त्रं, कामशास्त्रं च प्रतिपादितानि सन्ति। किञ्च वेदेषु तत्कालीनस्य समाजस्य वैशद्येन चित्रणं समुपलभ्यते। वेदेषु एवं बहु किमपि अस्ति यानि वेदालोकेन प्रकाशितानि सन्ति। तेषु विषयेषु स्त्र्यधिकारः इत्ययं विषयः आधुनिकसमये प्रायः चर्चितो भवति। आधुनिकसमये नारीवादिन्यः नार्यः कदाचित् 'पुरुषप्रधाने समाजे नारीणां अधिकारः नास्ति', 'पुरुषैः नार्यः शोषिताः भवन्ति' इति एवं प्रकारेण चित्कुर्वन्ति। अतः ताः नारीवादिनीः 'प्रचीने भारते स्त्र्यधिकारः कथमासीत्' इति दर्शयितुं पुरातनैः ऋषिभिः साक्षात्कृतानां वेदानामध्ययनं कार्यम्। वेदेभ्यः ज्ञायते यत् तस्मिन् समये बहुषु क्षेत्रेषु विषयेषु च स्त्रीणां बाहुल्येन अधिकारः आसीत्। स्त्रीभ्यो सुमहत्स्थानं मनुस्मृतौ सम्प्रदत्तम् —

"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।"[3]

भारतवर्षे नार्यः मातृरूपेण पूजिताः भवन्ति ---

"या देवी सर्वभूतेषु मातृ-रूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥"

तैत्तिरीयोपनिषदि कथितमस्ति - "मातृदेवो भव।" नीतिशास्त्रेषु विनिर्दिष्टं - "मातृवत्परदारेषु।"

कन्यापूजाऽऽपि भारतीयहिन्दुसंस्कृतौ अनुष्ठिता भवति। अनेन कन्यानां समाजे पूज्यत्वं प्रकटितं भवति। अर्थात् भारतीयहिन्दुसमाजे कन्या देवीरूपेणैव अङ्गीकृता वर्तते। भारतभूमौ जाया पत्युः अर्धाङ्गिनी इति सर्वस्वीकृतमस्ति। 'दम्पती' इति शब्दोऽपि स्त्रीपुंसयोः समानतामेव प्रदर्शयति। एव भार्यायाः यथार्थं स्वरूपं गरुडपुराणे प्रदत्तं ---

"कार्येषु दासी करणेषु मन्त्री भोज्येषु माता शयनेषु रम्भा।
धर्मानुकूला क्षमया धरित्री भार्या च षाड्गुण्यवतीह दुर्लभाः।।"[4]

एवं प्रकारेण अन्येषु संस्कृतशास्त्रेषु काव्येषु च स्त्रीणां महिमा निरूपिता। अनेनैव तासां तत्कालीने समाजे स्थितिरनुमीयते एव। किञ्च तासां अधिकारस्य विषयेऽपि ज्ञानं भवति। स्त्री-स्वाधीनता तदानीं काले स्त्रीभ्यः प्रदत्ता आसीत्। यस्य प्रमाणं तु सर्वत्र संस्कृतवाङ्मयेषु परिलक्ष्यते। प्रस्तुतशोधपत्रस्य विषानुसारं वेदेषु स्त्रीणामधिकारः परिवर्तिनि 'पर्यालोचना' इति अंशे आलोचयिष्यते।

पर्यालोचना : प्राचीनभारतीयसंस्कृतेः सुवर्णयुगे नाम वैदिककाले स्त्रियः पुरुषैः सह समाजस्य अभ्युदये, उत्कर्षताविधाने परिष्करणे च सहायकाः आसन्। नारीशक्तिं पूर्णतया विकसयितुं यादृशी व्यवस्था तस्मिन् काले आसीत् तत्तु आधुनिके समये बहवः जनाः कल्पनामपि कर्तुं न शक्नुवन्ति। वैदिककाले स्त्री यशोदा कल्याणप्रदा, ऐश्वर्यप्रदायिनी, शक्तिरूपिणी च इति रूपेण परिगणिता अभूत्। विधातुः अपूर्वा सुरम्या च सृष्टिर्भवति नारी। वृहदारण्यकोपनिषदि स्त्री सृष्टेः अपूर्णतायाः पूरणकर्त्री इति अभ्युदीरितं —- "अयमाकाशः स्त्रिया पूर्य्यते।"[5] ऋग्वेदे स्त्री ब्रह्मा इति नाम्ना विभूषिता अस्ति — "स्त्री हि ब्रह्मा बभूविथ।" वैदिकसमये कन्या स्त्री वा पुत्रवदेव समानशिक्षायाः अधिकारिणी आसीत्। तदानीं समाजव्यवस्था शिक्षारम्भात्पूर्वं कन्यां उपनयनसंस्कारेण संस्कृतां कृत्वा अध्ययनोपयोगिनी अकारयत्। कन्या गुरुकुलमुषित्वा ब्रह्मचर्यस्य पालनपूर्वकं यज्ञोपवीत-मौञ्जी-मेखला-वल्कलवस्त्राणि धारयन्ती विद्यार्जनं चकार। यमस्मृतौ अस्य प्रमाणं समुपलभ्यते -

[3] मनुस्मृति ३/५६

[4] गरुड़पुराण

[5] बृहदारण्यक उपनिषद् 1-4-3

"पुराकल्पे कुमारीणां मौञ्जिबन्धनमिष्यते।

अध्यापनं च वेदानां सावित्रीवचनं तथा।।"

यजुर्वेदेषु कन्या यथा सुशिक्षां प्राप्नुयात् तदर्थमुद्देशो प्रादीयत। अथर्ववेदे याः कन्याः ब्रह्मचर्यस्य पालनपूर्वकं शिक्षां लब्धवत्यः शिक्षापरिसमाप्त्यनन्तरं तासां कृते सुयोग्यानां वराणां निर्देशो वर्तते।[6] वेदेषु 'बहवृची'(संहितायाः अधिकाधिकानां मन्त्राणां पण्डिता) 'कठी' (कठशाखायाः अध्ययनकारिणी) आपिशला (आपिशलिव्याकरणस्य अध्ययनकर्त्री) इत्यादीनां शब्दानाम् उल्लेखत्वात् प्रमाणीभवति यत् स्त्रिय उच्चशिक्षां लब्ध्वुम् अधिकारिण्यः आसन्। वैदिककाले नारी ब्रह्मचर्यस्य पालनपूर्वकं सुशिक्षां प्राप्नुयात् इति नियमव्यवस्था आसीत्। किञ्च शिक्षापरिसमाप्त्यनन्तरं तासां कृते मार्गद्वयस्य विकल्प आसीत्। एकस्मिन् विकल्पे नारी सुयोग्येन वरेण विवाहं कर्तुं अशक्नोत्। अपरस्मिन् पक्षे शिक्षायाः सर्वोच्चशिखरं स्प्रष्टुं शशाक। अस्मिन् मार्गे गार्गी, मैत्रेयी, लोपामुद्रा, इन्द्राणी, वाक्-आम्भृणी, शची, पौलमी, घोषा प्रमुखाः विदुष्यः स्त्रियः आसन्। तास्तु याज्ञवल्क्यादिभिः ऋषिभिः सह शास्त्रार्थमपि कृतवत्यः। अतो वैदिकसमये स्त्रीणां वेदाध्ययने अधिकार आसीत्। किञ्च उच्चशिक्षिताः विदुष्योऽपि आसन् इति अनायासेन बोध्यते। वैदिककाले स्त्रीणां वेदाध्ययने अधिकार आसीत्। अतः तासां पुरुषवदेव यज्ञकर्मणि अपि अधिकार अवर्तत। अथर्ववेदे एकस्मिन् स्थले यज्ञकर्मणि भागग्रहणे, यज्ञकार्यसम्पादने, अपरेभ्यः यज्ञविषयकशिक्षाप्रदाने अधिकारिणी आसीत्।[7] वेदे स्त्री चतुष्कपर्दा[8] अर्थात् धर्मादिचतुर्वर्गस्य प्रदायिनी अथवा चतुष्कोणवेदीनिर्माणस्य ज्ञात्री आसीत्। एतदतिक्तं अनेकेषु स्थलेषु संयुक्ताभ्यां पतिपत्नीभ्यां सम्पादनीयस्य यज्ञकर्मणोऽपि विवरणं प्राप्यते। ऋग्वेदस्य दशममण्डलस्यान्तर्गते ११४ तमं सूक्तं यज्ञकार्यसम्पादने नारीणां जन्मसिद्धमधिकारं समर्थयति। तैत्तिरीयब्राह्मणे ऊररीक्रियते गृहस्थः पत्नीं विना एकाकी यज्ञं सम्पादयितुमधिकारी नास्ति-

"अयज्ञीयो वा एष योऽपत्नीकः।"[9]

पत्न्याः अभावेन यज्ञानुष्ठानं सम्पन्नं नाङ्गीचकारः। किञ्च केवलं पतिना अग्नौ प्रदत्ता आहूतिर्देवैर्न स्व्यकरोत्। अतो यज्ञकर्मणि स्त्रीणामधिकार आसीत् इति न संशयः।

विवाहे नारीणाम् आत्मेच्छायायः मूल्यमासीत्। कन्यायाः विवाहो भव्यव्यवस्थायां सम्पन्नोभूत्। किञ्च विवाहविषये ताः कन्यकाः निर्णयं नेतुमपि शक्तवत्यः। ऋग्वेदे प्रोक्तं तस्मिन् समये विवाहयोग्या का अपि युवती मनोनुकूलं चेतुं स्वाधीना आसीत्। वेदे विनिगद्यते ---

"ब्रह्मचर्येण कन्या युवानं विन्देत पतिम्।"[10]

क्षत्रियसमाजे स्वयंवरप्रथा प्रचलिता आसीत्। अनया प्रथया ज्ञायते यत् तदा विवाहक्षेत्रे वरग्रहणे युवतीनां पूर्णतया अधिकारोऽवर्तत।

तदानीं पुनर्विवाहस्य विधवाविवाहस्य वा संकेतो मिलति। ऋक्संहितायाम् अभ्युदीरितं - "विधवेव देवरम्।"[11] अर्थात् पत्युः मृत्योरनन्तरं सन्तानोत्पत्तिहेतौ तस्याश्च जीवनस्य निर्वाहनाच्च देवरेण सह विवाह उल्लिखितोऽस्ति-

[6] अथर्ववेद -११/५/१८

[7] अथर्ववेद -६/१२२/५

[8] ऋग्वेद - १०/११४/३

[9] तैत्तिरीय ब्राह्मण – ३/३/३/११ (भट्टभास्कर मिश्र टीका)

[10] अथर्ववेद ११/५/१८

[11] ऋग्वेद - १०/४०/२

"हस्ताग्राभस्य दिधिषोस्तवेदं पत्युर्जनित्वमभि संबभूव।।"[12]

विवाहपश्चात् विवहिता पत्नी एव गार्हस्थ्यधर्मस्य मूलस्तम्भः। ऋग्वेदे सा एव गृहमिति प्रोक्तं - "जायेदस्तम्"[13] अर्थात् जाया एव गृहम्। अस्मिन् प्रसङ्गे सुभाषितं वर्तते —

"न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते"

पति-श्वसूर-श्वश्रू-आदीनां तथा अन्येषां परिवारस्य जनानां सेवां भार्या कुर्यात् इति यथा वेदे निर्दिष्टम् तथैव अपरस्मिन् पक्षे सा भार्या गृहस्वामिनी गृहपत्नी, इति रूपेण परिगणिता सती श्वशुर-श्वश्रू-नन्दातृ-देवराणां सम्राज्ञी (स्वामिनी) इति भाषिता–

"सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वां भव।

ननान्दरि सम्राज्ञी भव, सम्राज्ञी अधि देवृषु।।"[14]

अनेन नारीणां गौरवस्तथा तदानीं तासामधिकारोऽविषये सम्प्रज्ञानं सुस्पष्टतया सर्वेषां भवति। आर्थिकक्षेत्रषु अपि स्त्री सम्पन्ना सामर्थ्यवती चासीत्। तस्यां सम्पत्तिसम्बन्धितो बहवोऽधिकारा अवर्तन्त। विवाहकाले पतिना शपथीक्रियते स्म यत् स आर्थिकविषयेषु पत्न्याः कस्यापि अधिकारस्य हितस्य च अतिक्रमणं न करिष्यति। [15]नारीणां सुदृढायै आर्थिकस्थित्यै तदानीं स्त्रीधनस्य व्यवस्था बभूव। विवाहस्य समये स्त्री उपसंहाररूपेण यानि द्रव्याणि आत्मीयेभ्य अतिथिभ्यः अप्राप्नोत्, तानि सर्वाणि एव स्त्रीधनम् इति कथ्यते। धनमिदं "परिणाह्य" इति रूपेण तैत्तिरीयसंहितायां[16] संकेतितम्। तत्र विनिगदितं- "पत्नी वै परिणाह्यस्य ईशः।"अर्थात् उपहाररूपेण नारीमुद्दिश्य प्रदत्तेषु द्रव्येषु तासामेव नारीणामधिकारः आसीत्।

अथर्ववेदे विधवास्त्रीणां कृते धनव्यवस्था कृता अवर्तत।[17] पुत्राणिव कन्यानामपि पैतृकसम्पत्तिषु अधिकारत्वमासीत्।[18] भातृहीना कन्या पितुः सम्पत्तीनामुत्तराधिकारिणी अभूत्।[19] या अविवाहिता कन्या आजीवनं पितृगृहम् अध्यातिष्ठत, तस्याः कन्यायाः कृतेऽपि प्रार्थना ऋक्संहितायाम्[20] अथर्ववेदसंहितायाञ्च[21] प्राप्यते। अनेन नारीणां तदानीं समये आर्थिकसबलता आसीत् इति ज्ञायते एव।

वैदिककाले स्त्रियः कृते उच्चशिक्षां लब्ध्वुम् अवगुण्ठनस्य प्रथा नावर्तत। स्त्रियः सर्वैः सर्वाभिः सह सामान्यतमं सुहृत्सम्पर्कं स्थापयितुं शक्तवत्यः। पर्दारहिता सत्यः ताः विद्यार्जनं कुर्वन्ति स्म। विवाहकाले नवबध्वोः दर्शनं आगतेभ्यः आत्मीयेभ्यः यथा भवेत्, किञ्च आशीर्वादकार्यं भवेत् तदर्थं तस्याः दर्शनस्य व्यवस्था बभूव।[22]तासां सभासमितिषु उत्सवादिषु अपि स्वच्छन्दतया गमनागमनं आसीत्। अथर्ववेदे प्रसङ्गोऽस्ति यत्र एका नारी सम्पत्तिविषयकस्य

[12] ऋग्वेद - १०/१८/८

[13] ऋग्वेद ३/५३/४

[14] ऋग्० १०.८५.४६ | अथर्व० १४.१.४४

[15] अथर्ववेद 10-30-5 12-3-14

[16] ¼6-2-1-1½

[17] अथर्वेद 18-3-1

[18] ऋग्वेद 2-17-7

[19] ऋग्वेद 1-124-7

[20] 10-85-13

[21] 14-1-13

[22] ऋग्वेद 10-85-33

E-ISSN: 3048-6041 | Volume- 3, Issue- 5 | May 2026

अधिकारहैतौ न्यायालयं गच्छन्ती आसीत्। गार्गी राज्ञो जनकस्य राजसभायां शास्त्रार्थं चकार। अतो वैदिकसमये नारीणां प्रगतेः सुरम्यं वातावरणं आसीत्।

उपसंहारः - वैदिककाले प्रायः सर्वेषु क्षेत्रेषु विषयाणां च निर्णयेषु स्त्रीणाम् अधिकारः आसीत्। तस्मिन् युगे ताः स्वतन्त्राः शिक्षिताश्च आसन्। किन्तु कालान्तरे सामाजिककुरीतयः पितृसत्तात्मकव्यवस्था च क्रमशः प्रबलाः अभवन्। परिणामतः उत्तरवर्तिनि काले नारीणां शिक्षा सीमिता सञ्जाता, तथा च अवगुण्ठनप्रथा (पर्दा-प्रथा), बालविवाहादयः कुप्रथाः प्रादुर्भूताः। अद्य यदा समाजे 'नारी-सशक्तीकरणस्य' विषये विमर्शः क्रियते, तदा वैदिकदृष्टिः अतीव प्रेरणादायिनी सिद्ध्यति। वेदाः अस्मान् शिक्षयन्ति यत् समानता, सम्मानं शिक्षा च स्त्रीणां नैसर्गिकाः अधिकाराः सन्ति। यदि आधुनिके समाजे पुनः तां वैदिकदृष्टिम् अङ्गीकुर्मः, तर्हि नारी केवलम् अधिकारसम्पन्ना न भविष्यति, अपितु सैव समाजस्य दशामपि परिवर्तयितुं समर्था वास्तविकी 'शक्तिः' भविष्यति।

**सन्दर्भग्रन्थसूची**

1. भट्टाचार्य, पण्डित बिधुभूषण (अनुवादक एवं व्याख्याकार). ऋग्वेद-संहिता (वङ्गानुवादसहित). कोलकाताः हरफ़ प्रकाशन.
2. शास्त्री, नृसिंहप्रसाद. वैदिक साहित्येर इतिहास. कोलकाताः संस्कृत पुस्तक भाण्डार, २००४.
3. मुखोपाध्याय, गोविन्दगोपाल. उपनिषदेर चिन्ता. कोलकाताः वर्धमान विश्वविद्यालय, १९७७.
4. बन्द्योपाध्याय, अमरकुमार. पौराणिक आख्यान ओ वैदिक साहित्य. कोलकाताः संस्कृत पुस्तक भाण्डार.
5. तर्कतीर्थ, पञ्चानन (सम्पादक). मनुस्मृति (कुल्लूकभट्टटीकासहित). कोलकाताः संस्कृत कॉलेज, १९७५.
6. चट्टोपाध्याय, क्षेत्रेशचन्द्र. वेद-मीमांसा. कोलकाताः कलकत्ता विश्वविद्यालय प्रकाशन.